# ॥ तत्त्वसूत्राधिकरणार्थः ॥

## ( अज्ञातकर्तृकम् )

॥ श्रीकृष्णपरमात्मने नमः ॥

अध्यायाः चत्वारः क्रमेण समन्वयाऽविरोध-साधन-फलनिर्णायकानि. तत्र प्रथमे स्वरूपबोधकवाक्यानि विचार्यन्ते. तानि द्विविधानि — सन्दिग्धानि निःसन्दिग्धानि च. सन्दिग्धानि पुनः चतुर्विधानि. तत्र प्रथमाध्यायस्य प्रथमे पादे कार्यप्रतिपादकानि विचार्यन्ते, द्वितीयपादे अन्तर्यामिप्रतिपादकानि, तृतीयपादे उपास्यप्रतिपादकानि, चतुर्थपादे प्रकीर्णकानि.

अथ द्वितीयाध्यायः. प्रथमपादे श्रुति-स्मृत्यविरोधः. द्वितीयपादे साङ्ख्यादीनां स्वातन्त्र्यनिराकरणम्. तृतीयपादे श्रुतिवाक्यानि विचार्यन्ते अविरोधेन. चतुर्थपादे जीवशरीरवत्ता प्राणादीनां विचारः.

तृतीयाध्यायस्य प्रथमे पादे जीवस्य ब्रह्मज्ञानोपयोगि-जन्मविचारः. द्वितीयपादे जीवस्य मुक्तियोग्यता. अत्रैव विरोधपरिहारेण ब्रह्मस्वरूपनिरूपणम्. तृतीयपादे गुणोपसंहारः. चतुर्थपादे कर्माद्यङ्गविचारः.

चतुर्थाध्याये प्रथमपादे ब्रह्मविदो जीवदशायां कर्तव्यस्य श्रवणादेः विचारः. द्वितीयपादे म्रियमाणस्य सर्वेन्द्रियलयादि-विचारः. तृतीयपादे क्रममुक्तिमार्गादि-विचारः. तुरीयपादे पुष्टि-मर्यादाभेदेन फलनिरूपणं, लीलानित्यत्वादिकं च वर्ण्यते.

॥ इति पादार्थसंग्रहः ॥

अध्यायाः चत्वारः, पादाः १६, अधिकरणानि १५५, सूत्राणि ५५५.

## प्रथमो अध्यायः

### अथ प्रथमपादाधिकरणानि

१. ब्रह्मविचाराधिकारः ‘‘अथातो ब्रह्मजिज्ञासा ॥१।१।१॥’’
२. कर्तृत्वप्रतिपादनं ‘‘जन्माद्यस्य यतः, शास्त्रयोनित्वात् ॥१।१।२॥’’
३. समवायित्वप्रतिपादनं ‘‘तत्तु समन्वयात् ॥१।१।३॥’’
४. वेदप्रतिपाद्यत्वं ‘‘ईक्षतेः न अशब्दम्... ॥१।१।४-१०॥’’ इत्यादि (सप्तसूत्राणि!).
५. ‘आनन्द’पदवाच्यं ब्रह्म इति ‘‘आनन्दमयो, अभ्यासात् ॥१।१।११-१८॥’’ (इत्यादि अष्टसूत्राणि!).
६. परमात्मैव सूर्यमण्डलस्थः ‘‘अन्तस्तद्धर्मोपदेशात् ॥१।१।१९-२०॥’’ (इत्यादि सूत्रे!).
७. ‘आकाश’शब्देन परमात्मा ‘‘आकाशः, तल्लिङ्गात् ॥१।१।२१॥’’
८. ‘प्राण’शब्दो ब्रह्मवाचकः ‘‘अतएव प्राणः ॥१।१।२२॥’’
९. ‘ज्योतिः’शब्देन ब्रह्म ‘‘ज्योतिः, चरणाभिधानात् ॥१।१।२३-२६॥’’ (इत्यादि चतुःसूत्राणि!).
१०. ‘आसन्य’वाच्यं ब्रह्म ‘‘प्राणः, तथानुगमात् ॥१।१।२७-३०॥’’ (इत्यादि चतुःसूत्राणि!).

॥ इति प्रथमाध्याये प्रथमपादः ॥

### अथ द्वितीयपादाधिकरणानि

१. ब्रह्मएव उपास्यः इति ‘‘सर्वत्र प्रसिद्धोपदेशात् ॥१।२।१-४॥’’ (इत्यादि चतुःसूत्राणि!).
२. हिरणमयः पुरुषो ब्रह्म ‘‘शब्दविशेषाद् ॥१।२।५-८॥’’ इति (चतुःसूत्राणि!). अत्रैव गीतायाः स्मृतित्वं श्रुतित्वं च ‘‘स्मृतेश्च ॥१।२।६॥’’
३. अत्ता भगवानेव ‘‘अत्ता, चराचरग्रहणात् ॥१।२।९-१०॥’’ (इत्यादि सूत्रे!).
४. ‘जीवात्म’पदवाच्यं ब्रह्म ‘‘गुहां प्रविष्टौ आत्मानौ हि, तद्दर्शनात्

॥१।२।११-१२॥'' (इत्यादि सूत्रे!).
५. 'अक्षिपुरुष'पदवाच्यं ब्रह्म ''अन्तरः उपपत्तेः ॥१।२।१३-१७॥'' (इत्यादि पञ्चसूत्राणि!).
६. 'अधिदैवादि'पदवाच्यं ब्रह्म ''अन्तर्यामि अधिदैवादिषु तद्धर्मव्यपदेशात् ॥१।२।१८-२०॥'' (इत्यादि त्रिसूत्राणि!).
७. ईडा ब्रह्मविद्यैव इति ''अदृश्यत्वादिगुणको धर्मोक्तेः ॥१।२।२१-२३॥'' इति (इत्यादि त्रिसूत्राणि!).
८. 'वैश्वानर'पदवाच्यं ब्रह्म ''वैश्वानरः, साधारणशब्दविशेषात् ॥१।२।२४-३२॥'' (इत्यादि नवसूत्राणि!). अत्रैव परिमाणविशेषविचारः ''साक्षादपि अविरोधं जैमिनिः ॥१।२।२८॥''

॥ इति प्रथमाध्याये द्वितीयपादः॥

अथ तृतीयपादाधिकरणानि.

१. द्युभ्वाद्यायतनं ब्रह्म ''द्युभ्वाद्यायतनं, स्वशब्दाद् ॥१।३।१-७॥'' इत्यादि (सप्तसूत्राणि!).
२. 'भूमा'शब्दवाच्यं ब्रह्म ''भूमा, सम्प्रसादाद् अध्युपदेशात् ॥१।३।८-९॥'' (इत्यादि सूत्रे!).
३. 'अक्षर'पदवाच्यं ब्रह्म ''अक्षरम्, अम्बरान्तधृतेः ॥१।३।१०-१२॥'' (इत्यादि त्रिसूत्राणि!).
४. 'पुरुष'पदेन अभिधाविषयः परब्रह्मैव ''ईक्षतिकर्मव्यपदेशात् सः ॥१।३।१३॥''
५. 'दहर'पदवाच्यं ब्रह्म ''दहरः उद्धरेभ्यः ॥१।३।१४-२१॥'' (इत्यादि अष्टसूत्राणि!).
६. ब्रह्मैव वाक्यार्थः ''अनुकृतेः तस्य च ॥१।३।२२॥'', ''अपि स्मर्यते ॥१।३।२३॥''
७. देहस्थपुरुषो भगवान् वाक्यार्थः ''शब्दादेव प्रमितः ॥१।३।२४-२५॥'' इति (सूत्रे!).

८. देवानामपि ज्ञाने कर्मणि च अधिकारः ''तदुपर्यपि च बादरायणः, सम्भवात् ॥१।३।२६-३३॥'' (इत्यादि अष्टसूत्राणि!). अत्रैव वैदिकपदार्थो आधिदैविको भिन्नः ''शब्दः इति चेत् न ... ॥१।३।२८॥'' अतः अत्रैव वेदस्य नित्यत्वम् ''अतएव च नित्यत्वम् ॥१।३।२९॥'' सूत्रात्.

९. संवर्गविद्यायां शूद्रस्य अधिकारो न ''शुगस्य तदनादरश्रवणात् ... ॥१।३।३४-३८॥'' (इत्यादि पञ्चसूत्राणि!).

१०. ब्रह्मैव वाक्यार्थः ''कम्पनाद् ॥१।३।३९॥'' इति.

११. परं ज्योतिः ब्रह्मैव ''ज्योतिः, दर्शनात् ॥१।३।४०॥''

१२. 'आकाश' पदेन ब्रह्मैव ''आकाशो, अर्थान्तरत्वादिव्यपदेशाद् ॥१।३।४१॥''

१३. ब्रह्मवाक्यमेव ''सुषुप्त्युत्क्रान्त्योः भेदेन ॥१।३।४२-४३॥'' (इत्यादि सूत्रे!).

॥ इति प्रथमाध्याये तृतीयपादः ॥

अथ चतुर्थपादाधिकरणानि.

१. श्रौतं न भवति साङ्ख्यमतम् ''आनुमानिकमपि एकेषाम् ... ॥१।४।१-७॥'' (इत्यादि सप्तसूत्राणि!).

२. 'अजा' शब्देन ज्योतिरेव गृह्यते ''चमसवद् अविशेषात् ॥१।४।८-१०॥'' (इत्यादि त्रिसूत्राणि!).

३. 'पञ्चजन' शब्देन प्राणादयः ''न सङ्ख्योपसग्रहाद् ... ॥१।४।११-१३॥'' (इत्यादि त्रिसूत्राणि!).

४. ब्रह्मकारणबोधकाङ्गीकारः ''कारणत्वेन च आकाशादिषु ... ॥१।४।१४॥''

५. असद्वाच्यमपि ब्रह्मैव कारणं ''समाकर्षाद् ॥१।४।१५॥'' इति एकेन.

६. ब्रह्मैव कारणं, न प्रकृतिः ''जगद्वाचित्वात् ॥१।४।१६-१८॥'' (इत्यादि त्रिसूत्राणि!).

७. ब्रह्मणएव प्रकरणित्वं ''वाक्यान्वयात् ॥१।४।१९-२२॥'' (इत्यादि

चतुःसूत्राणि!).

८. सर्वविधकारणं ब्रह्मैव ''प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधाद् ॥१।४।२३-२८॥'' (इत्यादि षट्सूत्राणि!).

॥ इति प्रथमाध्याये चतुर्थपादः ॥

## द्वितीयो अध्यायः

अथ प्रथमपादाधिकरणानि.

१. साङ्ख्यस्मृत्या वैदिकः समन्वयो न बाध्यते ''स्मृत्यनवकाशदोषप्रसङ्गः ... ॥२।१।१-२॥'' (इत्यादि सूत्रे!).

२. योगस्मृत्या समन्वयो न बाध्यते ''एतेन योगः प्रत्युक्तः ॥२।१।३॥'' इति.

३. शुष्कतर्केण समन्वयो न बाध्यते ''न विलक्षणत्वाद् अस्य, तथात्वं च शब्दात् ॥२।१।४-६॥'' (इत्यादि त्रिसूत्राणि!).

४. निषेधार्थत्वात् समन्वयो न बाध्यते ''असद् इति चेत् न ... ॥२।१।७-११॥'' (इत्यादि पञ्चसूत्राणि!).

५. कणादादिस्मृतिभिः समन्वयो न बाध्यते ''एतेन शिष्टापरिग्रहा ... ॥२।१।१२॥''

६. आचार्यैः तु सूत्रत्वम् अङ्गीक्रियते ''भोक्त्रापत्तेः अविभागः चेत् स्यात् ... ॥२।१।१३॥''

७. श्रुतिविरोधो न भवति ''तदनन्यत्वम् आरम्भणशब्दादिभ्यः ॥२।१।१४-२०॥'' (इत्यादि सप्तसूत्राणि!). अत्रैव आविर्भावाऽनाविर्भावेन प्रतीत्यप्रतीतिः.

८. हन्तृत्वादिदोषाः ब्रह्मणि न इति ''इतरव्यपदेशाद् हिताकरणादि ... ॥२।१।२१-२३॥'' (इत्यादि त्रिसूत्राणि!). अत्रैव ''अश्मादिवत् च ... ॥२।१।२३॥'' इति सूत्रव्याख्याने उच्चनीचत्वम् एवम्.

९. ब्रह्म निरपेक्षमेव ''उपसंहारदर्शनात् ... ॥२।१।२४-२९॥'' (इत्यादि षट्सूत्राणि!).

१०. सर्वशक्तिमत्त्वात् कर्तृत्वात् ''सर्वोपेता च तद्दर्शनात् ॥२।१।३०-३७॥''
(इत्यादि अष्टसूत्राणि!).

॥ इति द्वितीयाध्याये प्रथमपादः ॥

अथ द्वितीयपादाधिकरणानि.

१. अचेतनं केवलं कारणं न भवति ''रचनानुपपत्तेः च ... ॥२।२।१-६॥''
(इत्यादि षट्सूत्राणि!).

२. ब्रह्मणः कारणत्वं, न पुरुषस्य इति ''पुरुषाश्मवद् ... ॥२।२।७-१०॥''
इति (इत्यादि चतुःसूत्राणि!).

३. द्व्यणुकादिक्रमेण कारणत्वं न सम्भवति ''महद्दीर्घवद् वा ह्रस्व- ... ॥२।२।११-१७॥'' इति (इत्यादि सप्तसूत्राणि!).

४. बाह्यादिमतनिरासं, संसारप्राप्तिः न युक्ता इति ''समुदायः उभयहेतुकेऽपि ... ॥२।२।१८-२७॥'' (इत्यादि दशसूत्राणि!).

५. ज्ञानातिरिक्तः प्रपञ्चो अस्ति ''न अभावः, उपलब्धेः ॥२।२।२८-३२॥''
इत्यादिमतम् (पञ्चसूत्राणि!).

६. सप्तप्रकारयोजनं न युक्तं ''न एकस्मिन्, असम्भवात् ॥२।२।३३-३६॥''
(इत्यादि चतुःसूत्राणि!). विवसनानां मतम्.

७. जीवभिन्नेश्वरवादो न युक्तः, ''पत्युः असामञ्जस्याद् ॥२।२।३७-४१॥''
इत्यादि (पञ्चसूत्राणि!). तार्किकमतम्.

८. पञ्चरात्रोक्तप्रकारो चतुर्व्यूहांशरूपो न युक्तः ''उत्पत्त्यसम्भवात् ॥२।२।४२-४५॥'' (इत्यादि चतुःसूत्राणि!).

॥ इति द्वितीयाध्याये द्वितीयपादः ॥

अथ तृतीयपादाधिकरणानि.

१. आकाशः उत्पद्यते ''न वियद् अश्रुतेः ॥२।३।१-७॥'' (इत्यादि सप्तसूत्राणि!).

२. वायोः उत्पत्तिरेव ‘‘एतेन मातरिश्वा व्याख्यातः ॥२।३।८॥’’
३. सतो ब्रह्मणो न उत्पत्तिः ‘‘असम्भवस्तु सतो अनुपपत्तेः ॥२।३।९॥’’
४. वायुभावापन्नमेव ब्रह्म तेजोजनकं ‘‘तेजो अतः तथाहि आह ॥२।३।१०॥’’
५. तेजोभावापन्नादेव ब्रह्मणो अपां जन्म ‘‘आपः ॥२।३।११॥’’ इति एकेन.
६. ‘अन्न’शब्देन पृथिवी ग्राह्या ‘‘पृथिव्यधिकाररूप-शब्दान्तरेभ्यः ॥२।३।१२॥’’
७. आकाशादयो ब्रह्माधीनाः ‘‘तदभिध्यानादेव तु तल्लिङ्गात् सः ॥२।३।१३॥’’
८. आकाशादिसृष्टिव्यतिक्रमे लयः ‘‘विपर्ययेण तु क्रमो अतः उपपद्यते ॥२।३।१४॥’’
९. अन्नमयस्य प्राणमयस्य च उत्पत्तिः न वक्तव्या ‘‘अन्तरा विज्ञानमनसी ... ॥२।३।१५-१६॥’’ (इत्यादि सूत्रे!).
१०. जीवो न उत्पद्यते ‘‘न आत्मा, अश्रुतेः, नित्यत्वात् च ताभ्यः ॥२।३।१७॥’’
११. जीवो चैतन्यरूपो भवति ‘‘ज्ञो अतएव ॥२।३।१८॥’’ इति.
१२. जीवो अणुरेव, न व्यापकः ‘‘उत्क्रान्ति-गत्यागतीनाम् ॥२।३।१९-३२॥’’ (इत्यादि चतुर्दशसूत्राणि!).
१३. जीवस्यैव स्वाभाविककर्तृत्वं ‘‘कर्ता, शास्त्रार्थवत्त्वात् ॥२।३।३३-४०॥’’ (इत्यादि अष्टसूत्राणि!).
१४. ब्रह्माधीनमेव कर्तृत्वं जीवस्य ‘‘परात्तु तच्छ्रुतेः ॥२।३।४१-४२॥’’ (इत्यादि सूत्रे!).
१५. जीवो भगवदंशएव ‘‘अंशो, नानाव्यपदेशात् ... ॥२।३।४३-५३॥’’ (इत्यादि एकादशसूत्राणि!).

॥ इति द्वितीयाध्याये तृतीयपादः ॥

अथ चतुर्थपादाधिकरणानि.

१. ‘प्राण’शब्दो इन्द्रियवाची जीववत् नित्यः ‘‘तथा प्राणः ॥२।४।१-५॥’’

( इत्यादि पञ्चसूत्राणि ! ). अत्र मतान्तरमपि.

२. एकादशैव इन्द्रियाणि, न सप्त ‘‘हस्तादयस्तु स्थिते अतो न एवम् ॥२।४।६॥’’

३. प्राणाः जीवाः अणवएव ‘‘अणवश्च ॥२।४।७॥’’ इति एकेन.

४. मुख्यप्राणो नित्यएव ‘‘श्रेष्ठश्च ॥२।४।८-९॥’’ इत्यादि ( सूत्रे ! ).

५. गतिमान् अणुपरिमाणः भगवदधीनो, व्यवहारे प्राणवायुः जीवाधीनः ‘‘चक्षुरादिवत्तु ... ॥२।४।१०-१३॥’’ ( इत्यादि चतुःसूत्राणि ! ).

६. देवताधिष्ठितानामेव प्रवृत्तिः अस्ति ‘‘ज्योतिराद्यधिष्ठानम् ... ॥२।४।१४॥’’

७. प्राणसहितानाम् अग्न्यादीनामेव अधिष्ठातृत्वं ‘‘प्राणवता, शब्दात् ॥२।४।-१५-१६॥’’ ( इत्यादि सूत्रे ! ).

८. इन्द्रियाणि तत्त्वान्तराण्येव ‘‘तदिन्द्रियाणि, तद्व्यपदेशात् ... ॥२।४।१७-१९॥’’ ( इत्यादि त्रिसूत्राणि ! ).

९. नामप्रपञ्चकर्ता भगवानेव ‘‘सञ्ज्ञामूर्तिक्लृप्तिस्तु ... ॥२।४।२०॥’’

१०. स्वतन्त्राणि तत्त्वान्तराण्येव इन्द्रियाणि ‘‘मांसादि भौमं, यथा ... ॥२।४।२१-२२॥’’ ( इत्यादि सूत्रे ! ).

॥ इति द्वितीयाध्याये चतुर्थपादः ॥

## तृतीयो अध्यायः

अथ प्रथमपादाधिकरणानि.

१. संस्कृतैः भूतैः सहैव गच्छति ‘‘तदन्तरप्रतिपत्तौ रंहति संपरि- ... ॥३।१।१-७॥’’ ( इत्यादि सप्तसूत्राणि ! ).

२. सा अत्र शेषः इति ‘‘कृतात्यये अनुशयवान्, दृष्टस्मृतिभ्याम् ... ॥३।१।८-११॥’’ ( इत्यादि चतुःसूत्राणि ! ).

३. केषाञ्चित् सुकृतिनामेव पूर्वोक्तप्रकारेण ( ‘‘अनिष्टादिकारिणाम् ... ) ॥३।१।१२-१६॥’’ ( इत्यादि पञ्चसूत्राणि ! ).

४. अनिष्टादिकरणम् अस्ति इति सिद्धान्तः ‘‘विद्याकर्मणोः इति तु प्रकृतत्वात् ॥३।१।१७-२०॥’’ ( इत्यादि चतुःसूत्राणि ! ).

५. वृष्टेः अन्नं सङ्गतं ‘‘तृतीयशब्दावरोधः ... ॥३।१।२१-२३॥’’ ( इत्यादि

त्रिसूत्राणि!).

६. अन्नस्य रेतोभावो युक्तः ''अन्याधिष्ठिते, अपूर्ववदभिलापात् ॥३।१।२४-२५॥'' (इत्यादि सूत्रे!).

७. रेतः होम्यत्वम् उपपद्यते ''रेतःसिग्योगो अथ ॥३।१।२६॥'' इति.

६. योनिर्निर्गतं शरीरं गर्भः ''योनेः शरीरम् ॥३।१।२७॥'' साधनसहितो देहो ब्रह्मज्ञः.

॥ इति तृतीयाध्याये प्रथमपादः ॥

अथ द्वितीयपादाधिकरणानि.

१. स्वप्नसृष्टिः मायामात्रं ''सन्ध्ये सृष्टिः आह हि ॥३।२।१-६॥'' (इत्यादि षट्सूत्राणि!).

२. सुषुप्तौ प्रपञ्चनिर्माणं नास्ति ''तदभावो नाडीषु, तच्छ्रुतेः ... ॥३।२।७॥''

३. सुषुप्तिः द्विविधा. यत्रैव तिष्ठति तत्रैव जागर्ति ''अतः प्रबोधः ... ॥३।२।८-१०॥'' (इत्यादि त्रिसूत्राणि!). अत्रैव मूर्छायां स प्रबुध्यते ''मुग्धे अर्धसम्पत्तिः ... ॥३।२।१०॥''

४. स्थानभेदेन उभयधर्मवत्त्वं न सम्भवति ''न स्थानतोऽपि ... ॥३।२।११-१३॥'' (इत्यादि त्रिसूत्राणि!).

५. सर्वकामत्वादयो धर्माः न सन्ति एकदेशिमतम् ''अरूपवदेव ... ॥३।२।१४-१८॥'' (इत्यादि पञ्चसूत्राणि!).

६. सर्वकामत्वादयो धर्माः ब्रह्मणि सन्ति ''अम्बुदवद् अग्रहणात् ... ॥३।२।१९-२२॥'' (इत्यादि चतुःसूत्राणि!). सर्वत्र लौकिकं धर्मं प्रतिषेधति ''प्रकृतैतावत्त्वं ... ॥३।२।२२॥''

७. उभयविधवाक्यानां स्वार्थे प्रामाण्यं ''तद् अव्यक्तम् आह हि ॥३।२।२३-२४॥'' (इत्यादि सूत्रे!).

८. अत्र विरुद्धधर्माश्रयत्वं निर्णीतं ''प्रकाशादिवत् च अवैशेष्यम् ... ॥३।२।२५-२७॥'' (इत्यादि त्रिसूत्राणि!).

९. ब्रह्मधर्माः ब्रह्मरूपाः ''प्रकाशाश्रयवद् वा तेजस्त्वाद् ॥३।२।२८-३०॥''

इति (त्रिसूत्राणि!).

१०. ब्रह्मणः सकाशात् परम् उत्कृष्टं फलं नास्ति "परम् अतः सेतून्मान ... ॥३।२।३१-३७॥" (इत्यादि सप्तसूत्राणि!).

११. भगवानेव फलदाता, न अन्यः "फलम् अतः उपपत्तेः ॥३।२।३८-४१॥" (इत्यादि चतुःसूत्राणि!).

॥ इति तृतीयाध्याये द्वितीयपादः ॥

अथ तृतीयपादाधिकरणानि.

१. उपास्यानाम् अभेदाद् ब्रह्मत्वं "सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥३।३-।१-१५॥" (इत्यादि पञ्चदशसूत्राणि!). अत्रैव अधिकरणे उपासनादिमार्गीया व्यवस्था उक्ता "भेदात् ... ॥३।३।२॥". अस्मिन्नेव अधिकरणे प्रमाणसिद्धम् इदमेव श्रैष्ठ्यं "स्वाध्यायस्य तथात्वेन ... ॥३।३।३॥". अत्रैव उपासनामार्गीयोपास्यं विभूतिरूपं, नतु मूलरूपम् "आत्म- ... ॥३।३।१५॥"

२. आनन्दमयस्य ब्रह्मत्वमेव "आत्मगृहीतिः इतरवद् ... ॥३।३।१६-१७॥" (इत्यादि सूत्रे!).

३. पुरुषोत्तमस्यैव प्रियत्वेन उपासना "कार्याख्यानाद् अपूर्वम् ॥३।३।१८-२३॥" (इत्यादि षट्सूत्राणि!). अत्रैव अयोगोलके वह्निरिव तस्मिन् आवेशलक्षणः "सम्बन्धाद् एवम् अन्यत्रापि ॥३।३।२०॥"

४. 'पुरुष'पदम् उभयपरं ; "सहस्रशीर्षा" इत्यत्र परपरं "पुरुषविद्यायाम् इव च इतरेषाम् ... ॥३।३।२४॥"

५. कतिपयधर्मैः साम्यम् इति "वेधादि अर्थभेदात् ॥३।३।२५-२६॥" (इत्यादि सूत्रे!). आविर्भूतैः साम्यम्.

६. भक्तिदशायां पाप्मत्वाभावः "सम्पराये तर्तव्याभावात् ... ॥३।३।२७-२८॥" (इत्यादि सूत्रे!).

७. मुक्ति-भक्तादिविचारे अनुग्रहेण भक्तेः मुख्यत्वं "गतेः अर्थवत्त्वम् उभयथा ... ॥३।३।२९॥"

८. मुमुक्षोः सकाशात् रहस्यभजनकर्तैव श्रेष्ठः “उपपन्नः तल्लक्षणार्थो ... ॥३।३।३०॥”

९. धारणादिसाधकानाम् अमृते प्रत्येकं प्रवृत्तिः “अनियमः सर्वासाम् अविरोधः ... ॥३।३।३१॥”

१०. तेषां मार्यादिकजीवानाम् अधिभक्त्यैव मुक्तिः “यावदधिकारम् अवस्थितिः ... ॥३।३।३२॥”

११. ज्ञानमार्गे अक्षरप्राप्तिः भक्तिमार्गे पुरुषोत्तमप्राप्तिः “अक्षरधियां तु अवरोधः ... ॥३।३।३३-३४॥” (इत्यादि सूत्रे!).

१२. स्वात्मत्वेन ब्रह्मज्ञानं, न पुरुषोत्तमज्ञानम् “अन्तरा भूतग्रामवत् स्वात्मनः ॥३।३।३५-३७॥” (इत्यादि त्रिसूत्राणि!).

१३. सिद्धभक्तस्य सत्यादयो न विधीयते “सैव हि सत्यादयः ॥३।३।३८-३९॥” (इत्यादि सूत्रे!). काम-गृहादीनामपि भक्तिवत् मोक्षे साधकत्वं “कामादि इतरत्र तत्र ... ॥३।३।३९॥”

१४. भगवद्धर्मान् कृत्वा आश्रमधर्माः कर्तव्याः “आदराद् अलोपः ॥३।३।४०-४१॥” (इत्यादि सूत्रे!).

१५. इच्छाज्ञानवता तत्सन्देहवता च कर्म कर्तव्यं “तन्निर्धारणानियमः ... ॥३।३।४२॥”

१६. सर्वात्मभावो विहितसाध्यो न “प्रदानवदेव तदुक्तम् ॥३।३।४३॥”

१७. सर्वतोधिकत्वात् तद्वरणं सर्वतः कालादेः बलीयः “लिङ्गभूयस्त्वात् ... ॥३।३।४४-५३॥” (इत्यादि दशसूत्राणि!).

१८. इतरसाधनसापेक्षं ब्रह्मज्ञानं परं प्रापयति “व्यतिरेकः तद्भाव- ... ॥३।३।५४-५६॥” (इत्यादि त्रिसूत्राणि!). तत्तत्साधन-फलसम्पत्तौ भगवदिच्छैव नियामिका.

१९. ‘भूमा’शब्देन सर्वात्मभावएव “भूम्नः क्रतुवद् ज्यायस्त्वं ... ॥३।३।५७॥”. सर्वात्मभावस्य अलौकिकत्वं (तत्रैव!) “तथा हि दर्शयति ॥”

२०. उपास्ये अवतारान्तरभावनम् अयुक्तं “नाना, शब्दादिभेदात् ॥३।३।५८॥”

२१. कामैक्ये नियतफलानि तानि समुच्चीयेरन् ‘‘विकल्पो, अविशिष्टफल-त्वात्॥३।३।५९-६०॥’’ (इत्यादि सूत्रे!).
२२. तत्तदुपासनायां तत्तदङ्गविशिष्टमेव निर्दिश्यते ‘‘अङ्गेषु यथा ... ॥३।३।६१-६२॥’’ (इत्यादि सूत्रे!).
२३. सर्वरूपत्वेन एकत्र उपासनं साधु इति ‘‘समाहारात् ॥३।३।६३-६४॥’’ (इत्यादि सूत्रे!).
२४. यस्मिन् यादृग्धर्मवत्त्वं तादृग्धर्मविशिष्टम् उपास्यं ‘‘न वा, तत्सहभावाश्रुतेः ॥३।३।६५-६६॥’’ (इत्यादि सूत्रे!).

॥ इति तृतीयाध्याये तृतीयपादः ॥

अथ चतुर्थपादाधिकरणानि.

१. केवलसर्वात्मभावस्यैव फलसाधकत्वं ‘‘पुरुषार्थो अतः, शब्दात् ... ॥३।४।१-२५॥’’ (इत्यादि पञ्चविंशत्सूत्राणि!).
२. ब्रह्मज्ञानस्य कर्मशेषत्वसम्भावनापि न, स्वरूपोपकारी अस्ति इति ‘‘सर्वापेक्षा च, यज्ञादिश्रुतेः, अश्ववत् ॥३।४।२६-३१॥’’ (इत्यादि षट्सूत्राणि!). ज्ञानमार्गीय-भक्तिमार्गीयादिकृत-निषिद्धान्नभक्षण-विचारः.
३. जातज्ञानस्य आश्रमकर्म कर्तव्यं ‘‘विहितत्वाच्च आश्रमकर्मापि ॥३।४।३२-३९॥’’ (इत्यादि अष्टसूत्राणि!). भगवद्धर्माविरोधेन तत् कर्तव्यम्. मुक्तानां भक्तानां भजनम्.
४. तदीयानां मुक्तिः न, भगवदीयत्वेनैव पूर्णार्था ‘‘तद्भूतस्य तु न अतद्भावो ... ॥३।४।४०॥’’
५. भक्तस्य ब्रह्मलोकाद्यधिकारं न ददाति ‘‘नच आधिकारिकमपि ... ॥३।४।४१-४२॥’’ (इत्यादि सूत्रे!).
६. गृहत्यागः आवश्यकः इति ‘‘बहिस्तु उभयथापि, स्मृतेः आचारात् च ॥३।४।४३-४६॥’’ (इत्यादि चतुःसूत्राणि!).
७. पुष्टौ तु वरणे न अन्यापेक्षा ‘‘सहकार्यन्तरविधिः पक्षेण ... ॥३।४।४७॥’’
८. गृहएव उक्तरीत्या प्रभुभजनं कार्यं ‘‘कृत्स्नभावात् तु गृहिणो- ...

॥३।४।४८-५१॥'' (इत्यादि चतुःसूत्राणि!).
९. नियमेन पुरुषोत्तमलीलारसानुभवफलं न ''एवं मुक्तिफलानियमः ... ॥३।४।५२॥''

॥ इति तृतीयाध्याये चतुर्थपादः ॥

## चतुर्थो अध्यायः

अथ प्रथमपादाधिकरणानि.

१. श्रवणादीनाम् आवृत्तिः कर्तव्या ''आवृत्तिः, असकृदुपदेशाद् ॥४।१।१-२॥'' (इत्यादि सूत्रे!).

२. सर्वथा अनावृत्तिम् आह इति ''आत्मेति तु उपगच्छन्ति ग्राहयन्ति च ॥४।१।३-५॥'' (इत्यादि त्रिसूत्राणि!).

३. प्रतीकोपासनत्वं नास्ति किन्तु ब्रह्मत्वं ''आदित्यादिमतयश्च अङ्गे, उपपत्तेः ॥४।१।६-१०॥'' (इत्यादि पञ्चसूत्राणि!). भक्तेच्छाम् अपेक्ष्य अचलत्वं चलत्वं च.

४. भगवत्सत्स्वरूपे विशेषाभावात् न तारतम्यं ''यत्र एकाग्रता तत्र अविशेषात् ॥४।१।११॥''

५. एकैव अवस्था सार्वदिकी ; बहिःप्राकट्येऽपि न बहिष्ट्वानुसन्धानम् ''आप्रायणात् तत्र ... ॥४।१।१२॥''. तत्र दृष्टादृष्टसायुज्यफलम्.

६. ज्ञानेनैव मुक्तिः इति ''तदधिगमे उत्तर-पूर्वाघयोः अश्लेष-विनाशौ ... ॥४।१।१३-१६॥'' (इत्यादि चतुःसूत्राणि!).

७. पुष्टिमार्गीयस्य विनैव भोगं प्रारब्धं नश्यति ''अतो अन्यापि हि एकेषाम् ... ॥४।१।१७-१९॥'' (इत्यादि त्रिसूत्राणि!).

॥ इति चतुर्थाध्याये प्रथमपादः ॥

अथ द्वितीयपादाधिकरणानि.

१. भगवदनुग्रहेण मुक्तिः सम्पद्यते ''वाङ् मनसि, दर्शनाद् शब्दाच्च ॥४।२।१-४॥'' (इत्यादि चतुःसूत्राणि!).

२. मर्यादामार्गीयो न पुष्टौ प्रविशति ''भूतेषु, तच्छ्रुतेः ॥४।२।५-६॥'' (इत्यादि सूत्रे!).

३. एकस्मिन् ज्ञानिनि भक्ते वा मर्यादानियमो न किन्तु उभयोरपि विहितसाधनं विनैव पुष्टिमार्गमर्यादा ''समाना च, आसृत्युपक्रमाद् ... ॥४।२।७-१५॥'' (इत्यादि नवसूत्राणि!).

४. वियोजयति भगवान् भक्तं न इति आहुः ''अविभागो, वचनात् ॥४।२।१६॥''. नित्यलीलावादोपि.

५. ज्ञानमार्गीयाणाम् उत्क्रमणप्रकारो विलक्षणः ''तदोकोग्रज्व- ... ॥४।२।१७॥''

६. रश्म्यनुसारी निःक्रामति अयमेव इति ''रश्म्यनुसारी ॥४।२।१८-२१॥'' (इत्यादि चतुःसूत्राणि!). योगो भिन्नः.

॥ इति चतुर्थाध्याये द्वितीयपादः ॥

अथ तृतीयपादाधिकरणानि.

१. ज्ञानी एव तेनैव मार्गेण गच्छति, न भक्तोपि ''अर्चिरादिना तत्- ... ॥४।३।१-४॥'' (इत्यादि चतुःसूत्राणि!).

२. आतिवाहिको भगवदीयएव ब्रह्म प्रापयति ''आतिवाहिकाः ... ॥४।३।५-७॥'' (इत्यादि त्रिसूत्राणि!).

३. 'ब्रह्म'पदेन ब्रह्मवादेन आविर्भूतं परम् उच्यते ''कार्यं बादरिः, अस्य गत्युपपत्तेः ॥४।३।८-१५॥'' (इत्यादि अष्टसूत्राणि!).

४. कांश्चिदेव ब्रह्म प्रापयति ''अप्रतीकालम्बनात् नयति ... ॥४।३।१६॥''. गुरौ भगवदावेशात् तद्भावनम्.

५. परब्रह्मप्राप्तौ विशेषो अस्ति ''विशेषं च दर्शयति ॥४।३।१७॥''. ''सत्यं ज्ञानम् अनन्तं ब्रह्म'' इत्यस्य विचारः. एवमेव सर्वत्र नियतफलदानं तु स्वतन्त्रेच्छत्वात् लीलारूपम्. भक्तानामेव पुरुषोत्तमप्राप्तिः ; ज्ञानिनां तु अक्षरे प्राप्तिरेव.

॥ इति चतुर्थाध्याये तृतीयपादः ॥

अथ चतुर्थपादाधिकरणानि.

१. भगवत्कृतः आविर्भावो मुक्तानामपि भवति ''सम्पद्याविर्भावः ... ॥४।४।१-४॥'' (इत्यादि चतुःसूत्राणि!).

२. भजनानन्दः अप्राकृतेनैव भुङ्क्ते ''ब्राह्मेण जैमिनिः, उपन्यासा- ... ॥४।४।५-१२॥'' (इत्यादि अष्टसूत्राणि!).

३. भगवति विपरीतलीलादर्शनं तु व्यामोहः ''तत्तु अभावे सन्ध्य- ... ॥४।४।१३-१४॥'' (इत्यादि सूत्रे!).

४. भगवान् यदा यस्मिन् आविशति तदा अयमपि तथैव ''प्रदीपवद् आवेशः तथा ... ॥४।४।१५-१६॥''. (इत्यादि सूत्रे!). 'दिवु'धातोः अर्थः योजनाप्रमाणैः.

५. ब्रह्मणा सह भोगकरणं लौकिकव्यापाररहितं ''जगद्व्यापारवर्जम् ... ॥४।४।१७-२२॥'' (इत्यादि षट्सूत्राणि!). लीलानित्यत्वनिर्णयः. ''प्रत्यक्षोपदेशाद् इति चेत्, न, आधिकारिकमण्डल- ... ॥४।४।१८॥'' पुष्टिमार्गीयभक्तानां प्रवर्तकः कृष्णः ''अनावृत्तिः शब्दाद्, अनावृत्तिः शब्दाद् ॥४।४।२२॥''

॥ इति चतुर्थाध्याये चतुर्थपादः ॥